महा वि॰ का नाम

अ॰ वि॰ सं॰ महावि॰ रहीमपुर, खगड़िया।

दिनाङ्क - 21.12.2020

उपशास्त्री द्वितीय वर्ष

व्याकरण

भाग-4

विषय - बहुव्रीहि समास प्रकरणम्।

'उपमानादाचारे' इत्यनुवर्तमाने कर्तुः क्यङ् सलोपश्च' इति एनीशब्दात् क्यङि पुंवत्वे ङीब्लत्वयोर्निवृत्तौ, 'अकृत्सार्वधातुकयोः' इति दीर्घे ~~[struck out]~~ एतायते इति रूपमिति भावः। श्येनीवेति। श्येतशब्दः श्वेतपर्यायः। शुक्लशुभ्रशुचिश्वेत विशदश्येत पाण्डुराः'। इत्यमरः। क्यङादि पूर्वपत्। ननु स्त्रियाः पुंवत् - इत्येव मानिनी उत्तरपदे परतः पुंवत्वसिद्धेः मानिन्ग्रहणं किमर्थम् - मित्याशङ्क्य मानिन्ग्रहणमसमानिकरणार्थम् अस्त्रीलिङ्गार्थं चेत्यभिप्रेत्य असमानाधिकरणे परे ताबदुदाहरति - 'स्वभिन्नामिति'। दर्शनीयमानिनीति। दर्शनीयामिति द्वितीयान्ते उपपदे सुब्जातौ णिनिरित्यनुवृत्तौ 'मनः' इति णिनि प्रत्ययः, उपपद समासः, सुब्लुक्, असमानाधिकरणेऽपि मानिन्शब्दे उत्तरपदे परे अनेन पुंवत्वे टापो निवृत्तौ 'ऋन्नेभ्यः -' इति ङीपि दर्शनीयमानिनीति रूपम्। या आत्मानमेव दर्शनीयां मन्यते तस्या दर्शनीयायाः 'स्त्रियाः पुंवत्' - इत्येव पुंवत्वं सिद्धमिति ध्वनयितुं स्वभिन्नामित्युक्तम्। एकस्या एव दर्शनीयाया मनधात्वर्थं प्रति कर्मत्व कर्तृत्व भिन्नेऽपि वास्तवभेदेन मानिनीशब्द सामानाधिकरण्य सत्त्वादिति भावः। अथास्त्रीलिङ्गे उत्तरपदे उदाहरति - 'दर्शनीयामिति। स्त्रियमित्यनन्तर माऽमानमिति शेषः। आत्मानं यो दर्शनीयां स्त्रियं मन्यते स दर्शनीयमानी चैत्र इत्यन्वयः। अत्र उत्तरपदवाच्यस्य मानिनो वस्तुतो दर्शनीयस्त्री भेदेऽपि

NOTES

January 2021
wk M T W T F S S
01 1 2 3
01 4 5 6 7 8 9 10
02 11 12 13 14 15 16 17
03 18 19 20 21 22 23 24
04 25 26 27 28 29 30 31

2020 Wednesday December 23
358-008 • WK 52

आरोपित तद्भेदमादाय सामानाधिकरण्यं यद्यप्यस्ति, तथापि मानिन्शब्दस्य उत्तरपदस्य पुंल्लिङ्गत्वात् तस्मिन् परे पुंवत्त्वं न प्राप्तमित्यनेन ताद्धितिरिति भावः। ‘न कोपधायाः’। पाचिकाभार्य इति, पाचिका भार्या यस्येति विग्रहः। पचो ण्वुल्। अकादेशस्थानिवत्त्वान्न पुंवत्त्वनिषेधश्च। पुंवत्त्वे टाबित्वयोर्निवृत्तिः स्यात्। ‘रसिकेति’। रसोऽस्या अस्तीति रसिका, ‘अत इनिठनौ’ इति ठन्। ठस्येकः, टाप्, पुंवत्त्वनिषेधः। पुंवत्त्वे तु टापो निवृत्तिः स्यात्। ‘मद्रिकायत इति’। मद्रास्त्ये देशविशेषे भवा मद्रिका ‘मद्रवृज्योः कन्’ टाप्, इत्वम्, मद्रिकेवाचरतीत्यर्थः। ‘क्यङ्मानिनोश्च’ इति पुंवत्त्वं प्राप्तमिह निषिध्यते। मद्रिकामानिनीति। मद्रिकां मन्यत इत्यर्थे मनश्च इति णिनिः, उपपदसमासः। इहापि ‘क्यङ्मानिनोश्च’ इति पुंवत्त्वं प्राप्तं निषिध्यते। उभयत्रापि पुंवत्त्वे टाबित्वयोः निवृत्तिः स्यात्। तद्धितकुग्रहणमिति। ‘न तद्धितकुकोपधायाः’ इति सूत्रं पठनीयमिति यावत्। तद्धितसम्बन्धी कुसंबन्धी च यः ककारः तदुपधायाः स्त्रिया न पुंवत्त्वमिति फलति। मद्रिकायते इति तद्धितकोपधोदाहरणम्। पचिकाभार्य इति तु कुसंबन्धिकोपधोदाहरणम्। तद्धितकुग्रहणस्य प्रयोजनमाह — ‘नैकेति’। पाकेति। अर्भकपृथुकपाका वयसि’ इत्युणादिषु कप्रत्ययान्तो निपातितः। अयं तद्धितस्य कुप्रत्ययस्य वा न ककार इति नात्र पुंवत्त्वनिषेध इति भावः। ननु दत्ताशब्दस्य संज्ञात्वेन एकद्रव्यनिवेशितया भाषितपुंस्कत्वाभावात् ‘स्त्रियाः पुंवत्’ — इत्यस्य प्रसक्तेरेवाभावात् किं तन्निषेधेनेत्यत आह — ‘दानक्रियानिमित्त इति’।

दिनेश प्र० सिंह
एसोसियेट प्रोफेसर
(व्याकरण)

NOTES

Scanned with CamScanner